International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 243-245
© 2025 IJMH
www.themultijournal.com
Received: 04-12-2025
Accepted: 29-12-2025
Publish : 30-12-2025

**डॉ.पवित्रकुमारनन्दः**
अध्यापकः, संस्कृतविभागः,
नयागडप्रजामण्डलमहिलामहा-
विद्यालयः, नयागड

**Correspondence:**
**डॉ.पवित्रकुमारनन्दः**
अध्यापकः, संस्कृतविभागः,
नयागडप्रजामण्डलमहिलामहा-
विद्यालयः, नयागड

# वैदिकसंस्कृतौ दैवतवादस्य कपालिशास्त्रिभाष्यपरिप्रेक्ष्ये एकं समीक्षणम्

**डॉ.पवित्रकुमारनन्दः**

**शोधसारः**

देवाधीनं जगत्सर्वं मन्त्राधीनं तु देवता इत्याभाणकानुसारं वैदिकमन्त्रो देवानां स्तुत्यर्थं यजमानस्य कार्यसिद्ध्यर्थं विश्वस्य कल्याणार्थं सर्वाङ्गीणविकासार्थं च प्रवर्तते। वैदिकमन्त्रेषु तत्तदभिमानीदेवः स्तूयते। प्रत्येकं मन्त्रः कस्यचित् देवविशेषस्य स्तुतये प्रयुज्यते। तस्य च मन्त्रस्य विनियोगः कर्मपरवादिनां सायणादीनां भाष्यपङ्क्तौ विराजते। अतः वेदे नैके देवाः स्तूयन्ते इन्द्राग्निरुद्रमरुद्वरुणसूर्यवायुप्रभृतयः। ते च सर्वे देवाः यजमानेन प्रदत्तस्य हविर्द्रव्यस्य प्रापकाः सर्वाभीष्टप्रदायकाश्च भवन्ति। सायणीयभाष्ये अग्निः देवानां हविः प्रदाता, आह्वाता, सेनानी, पुरोहितः, ऋत्विक् इत्यादिरूपेण स्तूयते। स च पितृत्वेन बहुधा व्यपदिश्यते। किञ्च सर्वबलसमन्वितत्वेन इन्द्रः वायुश्च स्तूयेते। यजमानस्य सर्वाभीष्टप्रपूरणाय अश्विनौ स्तूयेते। विविधैः दृष्टान्तैः अश्विनोः स्तुतिरूपं फलं दर्शयितुमाख्यानादीनां विवरणं दत्तमस्ति। किञ्च सायंप्रातयोः देवत्वेन सविता स्तुयते। यश्च प्रसिद्धमन्त्रवर्णः सर्वैः यजमानैः साम्प्रतिकसमाजे अपि पठ्यते। सूर्यः सर्वेषां प्रेरकत्वेन स्तूयते। वाग्देवी सरस्वती अपि वागधिष्ठात्रीत्वेन वेदे स्तूयते। अन्यच्च नैके ऋषयः अपि देवत्वेन प्रतिभान्ति। तस्य च सूक्तस्य द्रष्टा देवता स एव ख्यायते। तदर्थं सायणभाष्यं कर्मपरत्वेन यद्यपि प्रसिद्धं भवति तथापि तत्र देवोपासना बहुधा कीर्त्यते। अन्यच्च केषुचिदेव सूक्तेषु प्रथममण्डले विष्णोः स्तुतिः प्राप्यते। स च वामनावतारत्वेन पुराणेषु उक्तविषयस्य सार्थक्यं विदधाति। सायणः देवोपासनायां स्तुतिपरकमन्त्राणां व्याख्यानं प्रतिपाद्य आध्यात्मिकतत्त्वानां विवरणं प्रददाति। **यज्ञो वै विष्णुः**[1] इत्याभाणकानुसारं यज्ञः विष्णोः स्वरूपं मत्वा अस्य च विष्णोः स्तुतिः सायणीयव्याख्याने सुष्ठु प्रतिभाति। पुराणादिषु ग्रन्थेषु यद्यपि विष्णुः मुख्यत्वेन परिगण्यते, परन्तु न तथा वेदेषु वर्तते। विष्णुसम्बन्धीनि पञ्च सूक्तानि ऋग्वेदे दृश्यन्ते। प्रथममण्डलस्य विष्णुसूक्तमत्र प्रस्तूयते।

आधुनिकसामाजेऽपि देवानां सर्वव्यापकत्वं सर्वनियतत्वञ्च वर्तते। सर्वप्राचीनग्रन्थरूपेण संस्कृत-साहित्यवाङ्मये वेदाः भवन्ति। परन्तु तेषाञ्च वेदानामर्थमवगन्तुं भाष्यं स्वीक्रियते। यद्यपि नैरुक्तादिषु ग्रन्थेषु देवानां विचारणप्रसङ्गे तत्तत्स्थानीयदेवानां विषये प्रोच्यन्ते, पुनः शौनकादिषु ग्रन्थेषु देवानां विषये महती चर्चा दृश्यते। निरुक्तग्रन्थे सप्तमाध्याये देवतानां महाभाग्यादेकमेनकत्वञ्च वर्तते।

तत्र देवानां स्थानं संख्यादिकमपि वर्तते। शौनकेन रचितबृहद्देवताग्रन्थेऽपि देवानां विषये मीमांसा वर्तते। अत्र पाश्चात्यविदुषां प्राच्यविदुषां गूढार्थसिद्धान्तिनां च मतविवेकः प्रस्तुतः। समेषु वेदेषु ऋग्वेदस्य अग्राधिकारो वैशिष्ट्यं सुष्टु प्रतिपाद्यते। देवानामधिकारः स्थानीयत्वं तेषां देवानां सर्वव्या-पकत्वमेकत्वं परिस्फुटं वर्तते। अन्तर्बहिश्च देवानामधिकारं पश्यतो गुढार्थसिद्धान्तस्य अर्थाविष्कारनये सर्वत्र अन्तरर्थश्च प्राधान्यं प्रतिपाद्यते।

## वैदिकसंस्कृतौ दैवतस्वरूपम्

आचार्यो यास्कः स्वनिरुक्तग्रन्थे सर्वादौ ब्रवीति **देवो दानाद्वा द्योतनाद्वा दीपनाद्वा द्युस्थानीयो भवति।** दिव् धातोः अच् प्रत्यये कृते निष्पद्यते देवशब्दः। देवतेति शब्दः स्त्रीत्वे भवति। उच्यते अस्मिन् प्रसङ्गे मनुना मनुस्मृतौ -

**देवानृषीन् मनुष्यांश्च पितन् गृह्याश्च देवताः।**
**पूजयित्वा ततः पश्चात् गृहस्थः शेषभुग् भवेत्॥**[2]इति

किञ्च महाभारते पठ्यते यत् – **क्षेत्रे सुकृष्टे ह्युपिते च बीजे देवे च वर्षत्यृतुकालयुक्तम्।**[3]

केचित्तु देवशब्देन इन्द्र इति व्याचक्षते। ऋग्वेदे देवशब्देनाऽपि ऋत्विक् इत्यस्य ग्रहणं भवति। यथा ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। देवानां स्तोत्रकारिणा-मृत्विजां ब्रह्मा ब्रह्माख्यर्त्विक्स्थानीयो भवति। प्रथममण्डलस्य प्रथमसूक्ते श्रूयते **अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्।**[4] अत्र दानदीपनद्योतनानामन्यतममर्थमाचष्टे। दैवतकाण्डे ज्ञायते यत् यत्काममृषिर्यस्यां देवतायामर्थपोत्यमिच्छन् स्तुतिः प्रयुङ्क्ते स मन्त्र तद् दैवतमुच्यते। देवानां बहवो भेदाः विविधैर्विद्वद्भिर्बहुभि-र्ग्रन्थैर्बहुप्रकारैश्च कल्पिताः। तथाविधाः सन्ति उपास्याः देवताः दशतय्यां संहितायां, येषां गूढार्थविवरणमन्तरेण तात्पर्यं न सङ्गच्छत इति तत्र बाह्यपक्षावलम्बनेऽसामञ्जस्यमेवापद्यते। पाश्चा-त्यविचारमार्गानुसारिणो यद्यपि नव्याः सायणीयाश्च बाह्यार्थ-पद्धतिमेवाश्रीयन्ते, तथापि तत्र भाष्ये देवानधिकृत्य भारतीय-प्राचीनसम्प्रदायानुसारेण न विद्वांसः सर्वथाऽनुयान्ति। सर्वत्र देवानां विषये तत्तल्लोकाध्यक्षत्वं तत्तदभिमानित्वमुपास्यत्वं मन्त्रेष्व-भिहिततत्त्वोपप्लवकस्त्वेन वाऽभिप्रयन्ति। परन्तु नव्यपरम्परा-नुसारमग्निवाय्विन्द्रसूर्यादीनामृग्वैदिकदेवतानां दृश्यब्रह्माण्डगतप-दार्थरूपमात्रमङ्गीकृत्याभिष्ठानाभिमानाध्यक्षतादीन् उद्धृत्य निरा-कार्षुः। यतोहि प्राकृतावस्थानां वेदकवीनां कल्पनामात्रमिति तत्र गूढार्थिसिद्धान्तिनः सङ्केतरूपत्वं पश्यन्तोऽपि पृथिव्यादीनां अग्न्याधिष्ठानत्त्वमभ्युपगच्छन्ति। अन्तर्वहिश्च देवानामधिकारं दृष्ट्वा अर्थाविष्कारणाय अन्यरर्थस्य प्राधान्यं स्पष्टीकृतम्। अत्रापि देवानां स्थानादिभेदाः गुणाद्युपलक्षणतया भेदाश्च बहुधा शास्त्रेषु प्रतीयन्ते। तेषाञ्च देवानामहाभाग्यादेव एकैव सन् विविधरूपेण स्तूयन्ते। तत्र निरुक्तानुगुणं तिस्रो देवताः प्रोक्ताः स्थानगतत्वे सन्ति। यथा –

पृथिवीस्थानीया देवता, अन्तरीक्षस्थानीया देवता, द्युस्थानीया देवता च।

### देवानामधिकारः

प्रधानदेवतानामिन्द्रादीनामप्रधानत्वेन परिगणितानामपिमरुदादी-नाञ्च स्थूलार्थपक्षे तत्र तत्र पर्यवसन्नोऽर्थो न सङ्गतो युज्यते। यथा **तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।**[5] अस्मिन् मन्त्रे प्रतिपादितो देवो वर्तते सूर्यो विष्णुः वेति। सूर्य एवायं विष्णुः, किन्तु नासौ लौकिको भवितुमर्हति। प्रत्यहं सञ्चारे नभो मध्यं तेनाधिगतं भवति तदेव परमपदं भवतीति वक्तव्यम्। अलौकिकोऽतीन्द्रियार्थः सूरिजनसाक्षाद्दर्शनविषय इति असंशयम्। न चेत् काल्पनिकमिदमसम्बद्धप्रलपितं भवेत् यत्सदा खमध्यं सूर्यकान्तं पश्यन्तीति।

अन्यदेकं मन्त्रं यदि निरीक्षामहे चेत् **उद् वयं तमसम् परि ज्योतिषपश्यन्त उत्तरम्। देवं देवत्रा सूर्यम् अगन्म ज्योतिरुत्तमम्**[6] इति। अस्यायमर्थो वर्तते यत् वयं तमसः पाप्मनः उपरि उर्म्य उत्कृष्टतरं वा ज्योतिः पश्यन्तः देवानां मध्ये देवं द्योतमानं सूर्यमुत्तमं ज्योतिः प्राप्नुयामः। अयमर्थः सामान्यार्थो वर्तते। अत्र सायुज्यमेव उक्तमृषिणा प्रस्कण्वेनेति तुरीयपादव्याख्याने सायण एवाह। अस्यामृचि स्पष्टमुक्तं यदतीन्द्रियार्थसूर्यपदवाच्यमुत्तमं ज्योतिः। यया कथञ्चिद् व्याख्यातेनाप्यनेन मन्त्रेण वाह्यो लौकिकः सूर्यो न निर्दिष्ट इति।

### भाष्यान्तरेषु दैवतस्वरूपम्

सायणीय वेदार्थप्रकाशे देवानां स्तुतिरूपाख्यं यागे प्रणोहितद्रव्यानां तत्तदुद्देश्येन सम्प्राप्य यजमानस्य हिताय देवाः त्रिस्थानेषु पृथिव्यन्तरीक्षद्युलोके च उषित्वा मानवानां कल्याणाय प्रभवन्ति। सायणभाष्ये इन्द्राग्निसूर्यविष्णुपूषामरुदादिदेवानां तत्तत्कर्मविपाकेन मन्त्रैः साध्याः स्तुत्या च भवन्ति। सूर्यस्य बहुधा आनन्दबोधादिषु भाष्यपरिप्रेक्ष्ये अग्निविद्युदादित्वेन प्रतिपत्तिः लक्ष्यते। वनस्पतीनां देवानां सोमपरत्वेन बहुधा स्तूयते। दर्शपौर्णमासचातुर्मा-स्यमग्निहो-त्रमग्निष्टोमादियागेषु देवाः यजमानानां किञ्च ऋत्विजा-मपि हिताय सर्वविधकल्याणं सम्पादयन्तीति भाष्यपङ्क्तौ बहुधा स्पष्टीयते। **श्रुणोतु मित्रो अर्यमा भगो नस्तु विजातो वरुणो दक्षो अंशः**[7] इत्यनेन मन्त्रेण एकत्वेन विविधाः देवाः सूर्यत्वेन मित्रस्य अर्यम्नः भगस्य वरुणस्य दक्षस्य च स्तुतिः कांक्ष्यते। अन्यच्च देवानां स्थानं द्युलोकभूलोकमन्तरीक्षे च आसाद्यत इति मन्त्रपङ्क्तौ श्रूयते। यथोच्यते-

**द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः।**
**समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः॥**[8]

### पाश्चात्यविदुषां मतम्

कपालिशास्त्रिणः भाष्यभूमिकायां न केवलं प्राच्यविदुषां मतानि आलोच्यन्ते अपितु पाश्चात्यमतान्यपि परिह्लीयन्ते। पाश्चात्याः अत्र बाह्याः इति पदेन व्यवहारः। वाह्याः सूर्यादयो भावा एव देवता इति वादो नोपपद्यत इति प्रदर्शयितुं सूर्यात्मकं विष्णुदेवताकमेकं ज्योतिःस्वरूपमिति वर्णयन्ति। किञ्च श्रूयते **अवाचचक्षं पदमस्य सस्वः उग्रं निधातुरन्वायमिच्छन्। अपृच्छमन्यान् उत ते म आहुः इन्द्रं नरो युयुधाना अशेम।**[9] अत्र स्पष्टार्थो भवति यत्प्रबोधे सति इन्द्रकामस्य इन्द्राधिगमो भवति। किमयं काल्पनिको देवः क्वाप्याकाशे वर्तते। इन्द्रमत्र निधातारं नितरां धारकमाह। अतो वैदिकदेवतावादस्य परिपन्थी कपालिशास्त्री आसीत्। न तु अस्य वैपरीत्यमाह।

### पाश्चात्यानां मतपरिहारः

यदि समीक्षां कुर्मश्चेदेकस्यैव देवस्य बहूनि नामानि अङ्गानि सन्तीति प्रागुक्तम्। किमयमाशयो मन्त्रवर्णेभ्यः एव सिद्ध्यति, उतौपनिषदि तन्त्रविदामर्वाक्कालिकानां व्याख्यानवलादिति संशयः। अस्मिन् प्रसङ्गे नव्याः भाष्यकाराः भिन्नरूपेण प्रतिपादयन्ति। यत् ऋग्वेदे प्रायशः नानादेवतावाद एव सर्वत्र विराजते। यद्यपि उपनिषत्सु **सत्यम् एकमेवाद्वितीयं ब्रह्मेति**[10] प्रतिपादितं यद्यपि कुत्रचिदेकदेवस्वरूपज्ञानमृषीणां लक्ष्यते, तथाऽपि तदर्वाचीनमन्त्रेषु विशेषतया लभ्यते। यत्र अग्निरिन्द्रोऽन्यो वा देवः

साक्षात्तदेकस्वरूपभावेन स्तूयते ऋग्वेदे। तदेकमेकं सत्, उत्तमज्योतिरिरिति च सूर्यपदवाच्यं परमसत्यं श्रूयते। यस्यैव व्यापरभेदाद् व्यक्तिनामभिः भिन्नाः देवाः इति च ज्ञायते। अत्र प्रथमं तावद् बहुधोदाहृतः प्रसिद्धो दैर्घतमसो मन्त्रवर्णो भवति। अत्र साररूपेण वक्तुं शक्यते यत् –

**इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।**
**एकं सद्विप्रा बहुधा वदन्त्याग्निं यमं मातरिश्वानमाहुः॥**[11]

अर्थादिन्द्रादिदेवाः बहुधा यद्यपि स्तूयन्ते परन्तु तेषां सर्वात्मकत्वमेकमेव। वेदे अग्नीन्द्रादीनां स्तुतिः विविधरूपेण ऋग्वेदे स्तूयते परन्तु तत्तु तत्तद्देवानामधिकारता प्रवर्तते।

**कपालिशास्त्रिदृष्ट्या देवानां माहात्म्यम्**

इत्थं देवानां व्यापारमहिम्ना यजमाने जातं महद्धनमेकमेव ज्योतिः तिसृणां मातृणां पुत्रत्वेन कीर्तितम्। यथा स सप्तधीतिभिर्हितः नद्योः अजिन्वदद्रुहः। या एकमक्षि वावृधुः। एवं च देवानामेकमूलत्व-मेकात्मत्वमेकलक्ष्यत्वञ्च मन्त्रवर्णैरिव ग्राह्याणि भवन्ति। तेषां पृथक्त्वं तु नामतो व्यापारतो व्यक्तित्वाश्रेयत्यवधेयम्। अत एव तेषां लिङ्गानि मन्त्रेभ्य एवागम्य पूर्वैराचार्यैः प्रोक्तानि। आयुधवाहन-वर्णादयोऽपि लक्षयन्ति देवताविशेषादेव।

एवमपि वक्तुं शक्यते यद् यद्यपि सर्वेषां देवानां कर्माणि ऊर्ध्वमूलानि परस्माद्धाम्नः प्रारभन्त इत्यसंशयं, तथापि तेषां प्राधान्यं साक्षात्साहाय्यमारादुपकारकत्वं वा यजमानस्य अध्वरप-दवाच्येन अन्तर्यागमार्गेण दिवमारोहतः इत्यपि वक्तव्यम्। तासां देवानां कर्तव्यानि ऊध्वमूलाद् आपृथिव्याः प्रवृत्तानि प्रसरन्ति, तत्र तत्र सोपानपदविशेषेषु यावदपेक्षं विभिद्यन्ते। एवम्प्रकारेण प्रायः सर्वे भाष्यकाराः भाष्यभूमिकायां स्वमतानि प्रतिपादयन्ति। अन्येषां मतानि च खण्डयन्ति। कपालिशास्त्रिमहोदयः स्वभाष्यभूमिकायां नव्यभाष्यशैल्या स्वमतमवादीत्। तदर्थं विद्वत्सु अस्मिन् प्रसङ्गे मतवैभिन्नं दरीदृश्यते। किञ्च देवतामीमांसा न केवलं कपालिशास्त्रिणः विचार्यविषयः, अपितु सर्वत्र देवताविचारो नितरां दृश्यते। कपालिशास्त्री भाष्यप्रणयनात्प्रागेव भाष्यस्य परिसमाप्ति-निमित्तं मङ्गलाचरणं विधातव्यमिति प्राचीनवचोभिः प्रभावितो भूत्वा मङ्गलाचरणं व्याहरति। परमेश्वरस्य स्तुतिं विधाय भाष्यभूमिकामरचयत्। यथोच्यते -

**जयति श्रीजुषामेको भुवनानामधीश्वरः।**
**पुरुषाणामशेषाणामात्मा यस्तमसः परः॥**
**जयत्युत्तमशब्दार्थः शब्दमूर्तिधरः पुमान्।**
**निःश्वासेन सृजन्विश्वꣳ प्राणवान् तपसा प्रभुः॥**[12]

**उपसंहारः**

वैदिकमन्त्राणां देवतापरकत्वे पर्यवेसितार्थः कर्मसम्पाद्यमाने च बहुधा लक्ष्यते। प्रत्येकं मन्त्रः निर्दिष्टः देवः स्तूयते। अविदित्वा ऋषिच्छन्ददेवतेति पदेन देवतामविज्ञाय मन्त्रोच्चारणे तन्मन्त्रो दोषाय प्रवर्तते। यच्च पापभाक् जन्तु तस्यापि प्रायश्चित्तं सुतरां विधातव्यमिति समस्ति नियमः। तदर्थं देवानामानुपूर्व्येण प्रतिपत्तिः ख्यायेत। इन्द्रवरूणरूद्रमरुत्सोमादिनानात्वेन देवाः प्राप्तप्रसङ्गे तदभिमानित्वेन यद्यपि स्तूयन्ते तथापि तासां देवतानामैक्यं तु सर्वथा सल्लक्ष्यते। अन्यच्च बहुत्वेन परिभाषितार्थस्य एकत्वमेवार्थं विजहाति।

**सन्दर्भग्रन्थसूची**


१.ऋग्वेदसंहिता,श्रीमत्सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशसहिता, श्रीमन्मोक्षमूलरभट्टः, कृष्णदास अकादमी, वाराणसी

२. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, २००७

३. निरुक्तम्, यास्काचार्यः, मुकुन्दझा शर्मा, चौखम्बा, वाराणसी

४. वैदिक देवता दर्शन, आचार्य डा प्रभुदयाल अग्निहोत्री, ईष्टर्न वुकलिङ्कर्स, दिल्ली

५. वैदिक देवता उद्भव और विकाश : गयाचरण त्रिपाठी, राष्ट्रिय अध्येता भारतीय उच्च अध्ययन संस्थान, शिमला, राष्ट्रिय-संसस्कृतसंस्थान, नई दिल्ली,

६. वैदिकसाहित्य और संस्कृति, बलदेव उपाध्याय, काशी, १९५८

७. मनुस्मृतिः, मन्वर्थमुक्तावली सहिता, चौखम्बा संस्कृत सीरीज, आफिस, वाराणसी, १९७०

८. यजुर्वेदः, चौखम्बा विद्याभवन, वाराणसी, ९८२

९. ऋग्भाष्यभूमिका, कपालिशास्त्री, माधव पुण्डलोक पण्डित श्री अरविन्दाश्रम:, पण्डिचेरी।

१०. ऋग्वेद के भाष्यकार तथा उनकी मन्त्रार्थदृष्टि, प्रो. ज्ञानप्रकाश शास्त्री, महर्षिसान्दिपनीराष्ट्रियवेद-विद्याप्रतिष्ठान, उज्जयिनी


**सङ्केताक्षरसूची**

1. तै.सं. १.७.४
2. म.स्मृ. ३.११७
3. म.भा. ३.२३५.२६
4. ऋ.सं. ९.१६.६
5. ऋ.सं. १.१२.२०
6. ऋ.सं. १.५०.१०
7. य. सं. ३३.४२
8. य. सं. १४.१.५
9. ऋ. सं ५.३०.३
10. छा.उ. ६.५.८
11. ऋ. सं १.१६४.४६
12. ऋ. भा. भू. कपा. प्र. ख पृ. १